## मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना आशा प्रकटिता यत् नवदेहल्यां विश्वनेतृभिः सम्मिलितं श्वस्तनादारभमाणं ब्रिक्स्-शिखरसम्मेलनं वैश्विक-कल्याणस्य आकांक्षया सह सकारात्मक-चर्चायाः आधारो भविष्यति।
- प्रधानमन्त्री मोदी रूसदेशस्य राष्ट्रपतिना व्लादिमिर् पुतिन् इत्यनेन सह द्वैपाक्षिकं वार्तालापं करिष्यति; परस्पर-हितस्य विविधविषयेषु चर्चाञ्च विधास्यति।
- राष्ट्रिय-राजधान्यां ब्रिक्स्-व्यापार-मञ्चस्य आरम्भः अभवत्; विदेश-कार्यमन्त्री डॉ. एस्. जयशङ्करः, ब्रिक्स्-संस्थायाः विंशतिवर्षाणि पूर्तौ वर्धमान-वैश्विक-अनिश्चितत्तायाः मध्ये सुदृढ-सततविकास- सहकारस्य च आह्वानम् अकरोत्।
- अमरीका-देशे नव/एकादश आक्रमणस्य पञ्चविंशतिवर्षपूर्तौ आतङ्कवादं विरुध्य युद्धाय भारतेन दृढनिश्चयो विहितोऽस्ति।
- हॉकी-क्रीडायां भारतं मलेशिया-देशं त्रि-एकम् अङ्कैः पराजित्य चीनदेशस्य मोक्वी-नगरे पुरुष-कनिष्ठ-एशिया-कप् इत्यस्मिन् अन्तिम-स्पर्धायां स्थानं प्राप्नोत्।

## ब्रिक्स-शिखरसम्मेलनम्

श्वः नवदेहली-नगरस्य भारतमण्डपे अष्टादशं ब्रिक्स्-शिखरसम्मेलनम् भविष्यति, एतदर्थं मञ्चः सज्जः अस्ति। शिखरसम्मेलने प्रधानमन्त्रिणा नरेन्द्रमोदिना रूसदेशस्य राष्ट्रपतये व्लादिमिर् पुतिनाय, चीनदेशस्य राष्ट्रपतये षी. चिन्फिङ्ग् इत्यस्मै दक्षिण-अफ्रिकादेशस्य राष्ट्रपतये सिरिल् रामाफोसाय, मिस्र-देशस्य राष्ट्रपतये अब्दुल् फत्ताह् अस्सीसी इत्यस्मै इण्डोनेशिया-देशस्य राष्ट्रपतये प्राबोवो सुबियान्तो वर्याय, ईरान्-देशस्य राष्ट्रपतये मसूद् पेज़ेश्कियन्, अबुधाबी-देशस्य युवराजाय शेख्-खालिद्-बिन्-मोहम्मद्-बिन्-जायद्-अल्-नह्यान् इत्यादिभ्यः विश्वनेतृभ्यः आतिथ्यं दीयते। भारतस्य अध्यक्षपदीयस्य षड्विंशोत्तरद्विसहस्र-तमवर्षस्य विषयः 'सुदृढतायै, नवाचाराय, सहकाराय, सततविकासाय च निर्माणम्' इति अस्ति। "समावेशि-वैश्विक-शासनम् अथ बहुपक्षवादस्य सुदृढीकरणम्" इति विषये ब्रिक्स् सदस्यराष्ट्राणां कृते समापनसम्मेल्लनस्य माध्यमेन शिखरसम्मेलनं श्वः आरप्स्यते। ब्रिक्स् सदस्यराष्ट्राणां नेतारः भारतमण्डपम् इत्यत्र भारत-नवान्वेषण-प्रदर्शनं द्रष्टुं शक्नुवन्ति। ते संयुक्त-वृक्ष-रोपणम् अपि करिष्यन्ति, यस्यानन्तरं प्रधानमन्त्रिणा मोदी वर्येण गाला-डिनराख्यं संयुक्तभोजं आयोजिष्यते। शिखरसम्मेलने प्रधानमन्त्रिणा ब्रिक्स् नेतृभिः सह अनेकानि द्वैपाक्षिकसम्मेलनानि आचरिष्यन्ते।

## ब्रिक्स-शिखरसम्मेलनम्

श्वस्तनादारभमाणस्य अष्टादशे ब्रिक्स्-शिखरसम्मेलने भागं ग्रहीतुं नवदेहल्यां सम्पूर्णविश्वस्य नैकाः नेतारः समागच्छन्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। अद्य सामाजिक-माध्यम-प्रसारे श्रीमोदी विश्वासम् प्रकटितवान् यत् अस्मिन् सम्मेलने विविधविषयेषु सकारात्मिका अर्थपूर्णा च चर्चा भविष्यतीति, यस्य मार्गदर्शकः उद्देश्यमस्ति विश्वस्य कल्याणमिति। भारतमण्डपम् इत्यत्र भविष्यति द्विदिवसात्मकं शिखरसम्मेलनं ब्राज़ील, चीन, मिस्र, इथियोपिया, इण्डोनेशिया, भारतम्, ईरान्, रूस, सऊदी अरब, दक्षिण-अफ्रीका, यू. ए. ई. इत्यादीनि एकादशानि प्रमुखाणि उदयोन्मुखानि विकासशीलानि च अर्थव्यवस्थायुतानि राष्ट्राणि च एकत्रितानि भवन्तीति अस्माकं संवाददाता उक्तवान्।

## प्रधानमन्त्री-द्विपक्षीयमन्त्रणा

प्रधानमन्त्री नरेन्द्रमोदी रूसदेशस्य राष्ट्रपतिः व्लादिमीर-पुतिन इत्येतौ अद्य सायं नवदिल्ल्याः भारत-मण्डपम इत्यत्र द्विपक्षीय-मन्त्रणां कृतवन्तौ। उभावपि नेतारौ परस्पर-हित-सम्बद्धेषु विस्तरेण विचार-विमर्शम् अकुरुताम् । मेलनेऽस्मिन् श्रीमोदिना प्राचीन-तमिळ-दार्शनिक-कवेः तिरुवळ्ळुवरस्य तिरुक्कुरल इत्याख्यस्य ग्रन्थस्य रूसी-भाषानुवादः राष्ट्रपतये पुतिन- महोदयाय उपहारत्वेन समर्पितः। प्रधानमन्त्री मोदी राष्ट्रपतिः पुतिनः च भारत-मण्डपम इत्यत्र आयोजितां इनोप्रॉम प्रदर्शनीम् अवलोकयताम्। राष्ट्रपतिः पुतिनः ब्रिक्स-शिखर-सम्मेलने भागं ग्रहीतुम् अद्य प्रातःकाले एव राष्ट्रिय-राजधानीं प्राप्तवान्। प्रधानमन्त्री मोदी अद्यैव सायङ्काले ईरान-देशस्य राष्ट्रपतिना मसूद-पेज़ेश्कियन इत्यमुना सहापि द्विपक्षीय-वार्तां करिष्यति। पश्चिम-एशिया-क्षेत्रस्य वर्तमानां स्थितिं संवीक्ष्य इयं मन्त्रणा अतीव महत्त्वपूर्णा मन्यते। इतोऽपि, स्वकीय-व्यस्त-दिनचर्यायाः अङ्गत्वेन प्रधानमन्त्री मोदी संयुक्त-राष्ट्र-सङ्घस्य महा-सचिवेन अंतोनियो इतरश महोदयेन सहापि मेलिष्यति।

## केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामन

ब्रिक्स्-शिखरसम्मेलनस्य 2026 इत्यस्मात् प्राक् नवदेहल्यां रशियन-सङ्घस्य उपप्रधानमन्त्रिणः डेनिस् मन्टुरोव्-वर्यस्य आगमनम् अभवत् केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनश्च अद्य प्रथमवारं तेन सह मिलितवती। उभययोर्देशयोःर्मध्ये आर्थिकसहयोग-सुदृढीकरणीय मार्गाणां विषये अपि चर्चा जाता।

**ब्रिक्स-व्यापारमञ्चः**

षड्विंशत्यधिक-द्विसहस्रतमस्य ब्रिक्स-व्यापार-मञ्चः अद्य नवदिल्ल्याः भारत-मण्डपम् इत्यत्र समारब्धः। अस्मिन् आयोजने सदस्य-राष्ट्रेभ्यः सहस्राधिकाः निगमाकारिणः, वाणिज्य-मन्त्रिणः, वित्तीय-नेतारः, वैश्विक-निवेशकाः, औद्योगिकाभिनव-प्रवर्तकाश्च एकत्रिताः भवन्ति । अद्य प्रातः सम्बोधयन् विदेशमन्त्री डॉ. एस. जयशङ्करः निरुपितवान् यत् ब्रिक्स-सङ्घटनस्य विंशति-वर्षपूर्तौ वर्धमानायाः वैश्विक-अनिश्चिततायाः मध्ये अधिक-दृढतायै , सततविकासाय , सहकाराय च दृढसङ्कल्पः आवश्यकः। सः अवोचत् यत् गभीर-सहकारेण दृढतर-सहभागितया च सततविकासस्य संवर्धनं काम्यम्, अत एव सुदृढता प्रत्येकस्य राष्ट्रस्य आर्थिक-रणनीतेः केन्द्रबिन्दुभूता सञ्जाता। अपरत्र, मञ्चस्य उद्घाटन-सत्रं सम्बोधयता वाणिज्योद्योग-मन्त्रिणा पीयूष-गोयलेन ब्रिक्स-देशेभ्यः आह्वानं कृतं यत् स्वकीयम् आर्थिक-सामर्थ्यं जनानां कृते उद्योग-अवसरेषु सम्पत्तौ, समृद्धौ च परिणमयितुं तैः परस्परं मिलित्वा कार्यं करणीयम्।

**ब्रिक्स नवप्रवर्तन-प्रदर्शनम्**

विदेशमन्त्रालयेन सह समन्वयेन शिक्षामन्त्रालयेन अद्य नवदेहली-नगरस्य भारतमण्डपे द्विवार्षिकस्य भारत-नवान्वेषण-प्रदर्शनस्य आयोजनं क्रियते, यत्र अष्टादशं ब्रिक्स्-शिखरसम्मेलनं 2026 अपि च तदनुगुणं भारतस्य डीप्-टेक् इति नवान्वेषणानि प्रदर्श्यन्ते। अस्यां प्रदर्शन्यां भारतस्य सप्तत्रिंशत् डीप्-टेक्-स्टार्ट्-अप्-संस्थाः, उद्यमाश्च प्रदर्शिताः सन्ति, ये भारतस्य ब्रिक्स्-अध्यक्षपदस्य स्थितिस्थापकतायाः, नवान्वेषणस्य, सहकारस्य, सुस्थिरतायाः च विषयवस्तुभिः सह संयुज्यन्ते।

**प्रधानमंत्री-9,11**

संयुक्तराज्य-अमेरिकायां सञ्जातस्य भीषणस्य नव-एकादश इत्याख्यस्य आतङ्कवादि-प्रहारस्य पञ्चविंशतितमे स्मृति-दिवसे भारतेन आतङ्कवाद-निर्मूलनाय स्वकीयः दृढसंकल्पः पुनरपि निरुपितः। प्रधानमन्त्री नरेन्द्र-मोदी अवोचत् यत् यद्यपि आतङ्कवादस्य स्वरूपं नैरन्तर्येण परिवर्तते तथापि सर्व-प्रकारकस्य आतङ्कवादस्य विरोधं कर्तुं भारतस्य सङ्कल्पः सर्वथा निष्कम्पः दृढश्च वर्तते। एतस्य घोर-प्रहारस्य पञ्चविंशतितमे वार्षिकोत्सवे अद्य सामाजिक-सञ्चारपटलीय-सन्देशे श्रीमोदी निरुपितवान् यत् आतङ्कवादेन जगति असंख्यानां निरपराधिनां जीवनं विनाशितम्। सः प्रत्यपादयत् यत् भारतं विगत-दशकेभ्यः आतङ्कवाद-विरोधि-संग्रामे अग्रिम-पङ्क्तौ संस्थितम् अस्ति। प्रधानमन्त्रिणा अस्मिन् घोर-प्रहारे मृतेभ्यः अश्रुपूर्णा श्रद्धाञ्जलिः समर्पितः अथ च तेषां शोकसन्तप्त-परिवाराणां कृते ऐक्यभावः प्रकटितः ।

**बिहारप्रवाहः**

बिहार्-राज्ये जलप्लावनस्य स्थितिः अद्यापि सङ्कटकरा एव अस्ति। राज्य-विपद्-व्यवस्थापन-विभागानुसारं चतुर्दश-मण्डलेषु पञ्चाशीतिषु खण्डेषु चतुश्चत्वारिंशत् लक्षतोऽधिकाः जनाः प्रभाविताः सन्ति। प्रभावितेषु मण्डलेषु साहाय्यकार्याणि प्रचलन्ति। जलसंसाधनविभागानुसारं, गतचतुर्विंशतिषु होराषु प्रमुखनदीषु जलस्तरः न्यूनः अभवदिति। परन्तु, अष्टनद्यः अद्यापि सङ्कट-चिह्नात् उपर्येव प्रवहन्त्यः सन्ति।

**ऋतुविभागः**

भारतस्य ऋतुविज्ञान-विभागेन अद्य छत्तीसगढ-राज्ये, तटीय-आन्ध्र-प्रदेशे, ओडिशा-राज्ये च प्रचण्डतोऽति-प्रचण्डवृष्ट्यै नारङ्गवर्णीया सञ्चेतना दत्ता अस्ति। अरुणाचलप्रदेशः, असम, मेघालय, झारखण्ड, केरलम्, माहे, मध्यप्रदेश, तेलङ्गाना, उत्तराखण्ड, विदर्भ, पश्चिमबङ्ग, सिक्किम, गुजरात इत्येतेषु प्रदेशेष्वपि अग्रिमाणि दिनानि यावत् प्रचण्डवृष्टिः भवितुम् अर्हति। एतदतिरिच्य दिल्ली-नगरे आगामीनि द्वि-त्रि दिनानि यावत् आकाशः मेघावृतः स्थास्यति अति-लघु-वर्षापि भवितुम् अर्हति।

**हॉकी**

कनिष्ठ-एशिया-चषक-हाकी-क्रीडायां भारतीय-कनिष्ठ-पुरुष-दलम् अद्य प्रथमायां उपान्त्यस्पर्धायां मलेशिया-देशम् एकस्योत्तरे त्रिभिः अङ्कैः पराजित्य चीनदेशस्य मोक्वी-नगरे अन्तिमस्पर्धायां स्थानं प्राप्तवत्। भारतस्य नायकः अन्मोल् एक्का इत्येषः द्विवारं गोल् इति लक्ष्यप्रापणं कृतवान्, सुख्वीन्दरः गोलैकं कृतवान्। अत्रान्तरे भारतीय-कनिष्ठ-महिला-दलम् श्वः उपान्त्यस्पर्धायां दक्षिणकोरिया-देशेन सह योत्स्यते।

**यू. एस्. ओपन् टेनिस्**

यू. एस्. ओपन्-टेनिस् इति क्रीडायां द्वितीय-सीड् एलेना रिबाकिना इत्येषा न्यूयार्क्-नगरे द्वितीयोपान्तचक्रीयायां क्रीडायां चतुर्थ-सीड् इति कोको गाफ़् इत्येनां पराजित्य, पूर्वविजेत्री आर्यना सबालेन्का इत्यनया सह महिलैकलेति उपाधिं प्राप्तवती तथा च तृतीय-ग्रैण्ड्-स्लैम्-उपाधिं प्राप्तुम् उद्यतवती। प्रथमायां उपान्त्यचक्रीय-क्रीडायां बेलारुस्-देशस्य शीर्षस्थानधारिका सबालेन्का इत्येषा अमेरिकीयायाः जेसिका पेगुला इत्येतां विरुध्य सप्त-पञ्च, षड्-द्वि इत्यङ्कैः विजयं प्राप्य अन्तिम-स्पर्धायां स्थानं प्राप्तवती।

**।। इति वार्ताः ।।**